International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(4): 04-09
© 2024 IJSR
www.anantaajournal.com
Received: 10-05-2024
Accepted: 13-06-2024

**Shobha N**
Research Scholar, PG Department of Studies in Sanskrit,Karnatak University, Dharwad, Karnataka, India

**Corresponding Author:**
**Shobha N**
Research Scholar, PG Department of Studies in Sanskrit,Karnatak University, Dharwad, Karnataka, India

# स्त्रीबलात्कारेणाभिगमाय भयोपायः औषधिर्भवितुं शक्यते वा ?

**Shobha N**

**सारांश**

"कामातुराणां न भयं न लज्जा"[1] इति पुराणोक्तरीत्या अत्यन्त कामलम्पटनां कृते समाजस्य भयमपि नास्ति लज्जाऽपि नास्ति । इदानीन्तन कालेषु अस्य वाक्यस्य पुष्टिरागतमितिरीत्या स्त्रीषु कामदृष्टिः वर्धित्वा बालिकानाम् उपरि बलात्कारः, महिलानां उपरि हिंसा, समूहबलात्कारादि वार्ताः प्रतिदिवसं शृण्मः । पितुः पुत्र्याः उपरि बलात्कारं कृतवान्, अग्रजः अनुजां बलात्कारितवान्, वृद्धेण शिशोः उपरि बलात्कारः एतादृशाः हिंसाचाराः सम्भवन्तः सन्ति । पवित्र बान्धवतायाः स्थानं विस्मृत्य शिशुः इत्यपि न दृष्ट्वा बलात्कारं कुर्वन्तः सन्ति । एतत् समाजस्य दुष्टमनस्थितिं दर्शयति । एतादृशानां बलात्कारिणां कृते असामान्यः दण्डः भवेत्। अग्रिमदिवसेषु बलात्कारः इति पदं श्रुत्वा एव तैः भयमनुभूतव्यं, एवं रीत्या दण्डः भवेत् । अत एव "स्त्रीबलात्कारेणाभिगमाय भयोपायः औषधिर्भवितुं शक्यते वा ?" इति शीर्षिकम् अस्ति ।

वैदिक युगे नारीणां स्थितिः महत्तमा परिलक्ष्यते । वैदिक युगे स्त्री कल्याणमयी, गुणवती, पतिव्रता, सहधर्मिणी, सुगृहिणीत्यादि रूपेण वर्णिता वर्तते । समाजस्य सर्वासु कार्यासु सा आद्या भूत्वा विराजते । अनादिकालातः नारीणां पूजनीय स्थानमस्ति । इयम् अस्माकं संस्कृतिः । एतादृश्याः मातृसमायाः स्त्रियः उपरि बलात्कारादि हिंसा असहनीया । अस्य बलात्कारस्य कृते कठिणदण्डः देयः । अस्य दण्डस्य विषये कौटिल्यस्य अर्थशास्त्रे उक्तमस्ति । कौटिलीय अर्थशास्त्रस्य कण्टकनिवारणम् इति चतुर्थे अधिकरणे स्त्रीप्रकर्म इति अध्याये बलात्कारस्य कृते कः दण्डः दातव्यः इति उक्तमस्ति । एतदाधारीकृत्य अयं लेखः मया लिखितः । वैदिकयुगे स्त्रीणां स्थितिः कथं आसीत्?, अद्यतन दिवसेषु स्त्रीणां स्थितिः कीदृशी वर्तते?, बलात्कारः इत्युक्ते किम्? (पूर्वोक्तरीत्या, IPC section उक्तरीत्या), इदानीन्तनकाले बलात्कारः- तस्य परिणामः, बलात्कारेण नार्याः मनस्थितिः कीदृशी भवति?, तस्याः मातापित्रोः स्थितिः कथं परिवर्तते ? बलात्कृतनारीं समाजः कथं पश्यति? एतस्य कृते कौटिल्योक्त दण्डोपायाः, अन्येषु देशेषु दीयमानाः दण्डोपायाः च अस्मिन् लेखे मया प्रस्तूयते ।

**कूटशब्द** : बलात्कारः, स्त्री, नारी, दण्डः, भयम्, कौटिल्यः, अर्थशस्त्रम्, वैदिक युगम्, पूज्यम्, अपराधः, भारत देशः, विदेशः, कठोरः, मृत्यु दण्डः ।

---

[1] गरुडपुराणम्/आचार्यकाण्डः/अध्यायः-११५.६७

### प्रस्तावना

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः [2] इति स्मृतिवाक्याधारेण स्त्री कुत्र पूजयति तत्र देवताः रमन्ते इति कथ्यते । एवं प्रकारेण अनादिकालात् अस्माकं प्राचीनधर्मे स्त्रियाः पूज्यं स्थानं वर्तते । स्त्रियः समस्ताः सकला जगत्सु[3] इत्युदृतः उक्तिः स्त्रीणां सर्वव्यापकत्वं दर्शयति ।

### वैदिकयुगे मातरं प्रति गौरवादरा

तस्याः समुद्रा अधि वि क्षरन्ति तेन जीवन्ति प्रदिशश्चतस्त्रः ।
ततः क्षरत्यक्षरं तद् विश्वमुप जीवति।[4]

(वेदमातुः ज्ञानरूपी समुद्र वर्णरूपी वृष्टिं करोति।तत् तु समस्त दिग्भ्यः उपजीव्यमस्ति।अतः अक्षरं,स्थिरं ज्ञानवर्षणं भवति।समस्त जगत् अयमाश्रित्य जीवति)

अयं तु स्वतः ऋग्वेदे -वेदसाहित्यं वेदमाता इति स्त्रीलिङ्गे सम्बोदितमस्ति । अस्य

आधारेण स्त्री विशाला, अद्भुता, असीमा, अनन्ता इति अतिशयोक्ति कर्तुं योग्या अस्ति ।

जननी जन्मभूमिश्च स्वर्गादपि गरीयसि [5] इति अद्भुत, अनुपम भावना अस्माकं प्राचीन भारतीयानाम् । एवं वैदिक युगे मातरं प्रति गौरवादराः, भक्तिः, पूज्यभावः अभिमानः आसीत् ।

### वैदिकयुगे पत्नीं प्रति गौरवादरा

एवमेव वैदिकयुगे पत्नी रूपेण स्त्रीं अत्यन्त गौरवेण भावयन्ति स्म। "गृहिणी गृहमुच्यते"[6] गृहिणी एव गृहं तां विना तत् गृहमेव न इति भव्य कल्पना असीत् । "अयज्ञियो वा एष अपत्नीकः"[7] पत्निं विना पतिः यज्ञ यागादि कर्मे अधिकारी भवितुं न शक्नुवन्ति स्म । तां विना स्वर्गापेक्षमपि कर्तुं न शक्यते स्म। तस्याः अनुपस्थितौ सः अपूर्णः आसीत् । एवं भारतीयानां कृते स्त्रीणां पवित्र कल्पना आसीत्।

### वैदिक युगे स्त्रीणां परिकल्पना

पुत्री, भगिनी, पत्नी, माता, हितैषी, स्नेहिता, परिचारिका भूत्वा तस्याः अनिवार्यता अनन्या वर्तते । पृथिवी माता सा भूमिः यत्र मनुष्यः निवासार्थं स्थानं दत्तवान् । माता गङ्गा कावेरी च यथा नद्यः पेयजलप्रदः । वनम् अनेकानां पशूनां पक्षिणां च आश्रयस्थानम् अस्ति तदर्थं वनदेवता इति । एवं स्त्री बालेभ्यः पाठन समये सरस्वती भूत्वा । गृहव्ययस्य संचालने यथा महालक्ष्मी भूत्वा । यथा अन्नपूर्णा पाकशालायाम् । यथा पार्वती कुलविषयेषु दृढनिर्णयविषये । एवं प्रकारेण भूमितः धनपर्यन्तं स्त्रियः मातृपदं पूजिताः, एतत् अस्माकं संस्कृतिः । एतादृशः मातृ समाना स्त्रीणां उपरि बलात्कार सदृशः कुचरितः, हिंसा असहनीयः ।

### बलात्कार

बलात्कारः तु पुरुषैः क्रियमाणा बलात् अपहरणमस्ति।तेषां कामतृषां निवारयितुं महिलानां, बालिकानां उपरि क्रियमाणा कुचरितमस्ति ।

Central government act (Section 375 in the Indian penal code)[8] बलात्कारं एवं विवरणं करोति । अस्याः परिभाषायाः अनुसारं "यदा पुरुषः अधोलिखितेषु षड् विवरणेषु कस्मिंश्चित् स्त्रियाः सह लैङ्गिक संभोगं करोति तदा बलात्कारः भवति ।

i) तस्याः मनसः विरुद्धम् अथवा

ii) तस्याः अनुमतिं विना अथवा

iii) सहमतिपूर्वकं, परन्तु तस्याः सहमतिः मृत्यभयस्य वा पीडनस्य वा भयस्य अधीनः अथवा

iv) तस्याः अनुमत्या, किन्तु यदा सः पाखण्डेन, वञ्चना, तां विश्वासं कृतवान् यत् सः तस्याः विधिपतिः अस्ति।

v) तस्याः अनुमोदनेन, किन्तु यदा सा बुद्धि भ्रमणेन वा मद्येन वा सहमतिमभिप्रेतवती अथवा तस्याः अनुमोदनस्य दुष्टपरिणामं न ज्ञात्वा अक्षमावस्थायां भवति स्म।

vi) यदा सा १६ वर्षाणां अधः भवति तदा सहमतिः, विना वा"

### भारते बलात्कार

२०२१ तमस्य वर्षस्य एन् सी आर् बी (National Crime Record bureau) संस्थायाः वार्षिकप्रतिवेदनानुसारं सम्पूर्णे देशे ३१, ६७७ बलात्कारस्य घटनाः सन्ति, प्रतिदिनं च प्रायः ८६ घटनाः भवन्ति। अयं च बलात्कारः प्रतिवर्षं वर्धमानः अस्ति।

(२०२०- वर्धनं २८,०४६

२०१९-३२,०३३)

एवं नित्य बलात्कार प्रकरणानां वृद्धिः न केवलं स्त्रियाः गौरवं न्यूनीकरोति अपितु बलात्कारपीडितानामुज्वलभविष्यमपि अन्धकारं करोति।

[2] मनुस्मृति/अध्याय ३/श्लोक ५६

[3] श्री दुर्गासप्तशती/एकादशोध्यायः-श्लोक-६

[4] ऋग्वेदभाष्य,१.१६४.४२.,भाग-२,सम्पुटम्-१४,पृ-१९६,वेदभाष्यप्रकाशन,बेङ्गलूर्,२००८

[5] वाल्मीकि रामायणम्,चौकाम्बा विद्या भवन, वारणासि,१९५७

[6] महा.शान्ति,१४४-६,पु-१३२८,भारतदर्शन प्रकाशन,बेङ्गलूरु १९९६

[7] श.ब्रा.५.१.६.१०,उद्दृत:वैदिक संहिताओं में नारी,डा.मालती शर्म,सम्पूर्णानन्द संस्कृत विश्वविद्यालय वारणासि.१९९०

[8] Indian Penal code(Central government act Section 375)

**उल्लेखनीयाः घटना**

अजमेर् बलात्कार प्रकरणम्-१९९२
दिल्ली सामूहिक बलात्कार-२०१२
मुम्बै सामूहिक बलात्कार-२०१३

एताः बलात्कारघटनाः मुख्यतया सम्पूर्णे देशे सनसनीभूताः अभवन्, तेषां बहुधा निन्दा च अभवत् । महिलानां कृते पर्याप्तसुरक्षां न दत्तवन्तः इति कारणेन राज्यस्य केन्द्र सर्वकारस्य च विरुद्धं बहवः विरोधाः अभवन्।
विरोधान्दोलनानां फलस्वरूपं लैङ्गक अपरधिनां शीघ्रं अन्वेषणं & अभियोजनं च प्रदातुं कानून संशोधनस्य उत्तममार्गाणाम् अध्ययनार्थं २०१३ तमस्य वर्षस्य दिसम्बर मासे न्यायिक समितिः स्थापिता।तथा च २०१३ तमे वर्षे आपराधिक कानून (निर्भय अधिनियम)[9] अध्यादेशः २०१३ राष्ट्रपतिप्रण्बमुखर्जी इत्यनेन घोषितः । अनेकाः नूतनाः नियमाः पारिताः । बलात्कार प्रकरणानां न्यायाधीशत्वेन द्रुतमार्गन्यायालयाः निर्मिताः ।

**स्त्रियाः उपरि प्रभाव**

कियन्तः विरोधाः क्रियन्ते कियन्तः नियमाः परिवर्तिताः चेदपि बलात्कारः केवलं बलात्कृतायाः स्त्रियाः शारीरिकप्रहारः एव न भवति, अपितु तस्याः व्यक्तित्वं नाशयति ।
घातकः पीडितां शारीरिकरूपेण नाशयति, बलात्कारी असहाया कन्यायाः आत्मानं नाशयति ।

दशपुत्र समा कन्या,दशपुत्रान्प्रवर्ध्दयन्।
यत्फलं लभते मर्त्यस्तल्लभ्यं कन्ययैकया॥[10]

एका कन्या दशपुत्रैः समः । दशपुत्रपालनात् किं फलं मनुष्यस्य, तत् फलं एककन्या प्रसवात् ।
एवं दश पुत्राः एकस्याः कन्यायाः तुल्याः इति पौराणिक कथायाः अनुसरणं कुर्वन्तः मातपितरः अतीव प्रेम्णा स्वकन्यायाः पोषणं, पालनं च कृतवन्तः । एतादृशानां मातापितृणां कन्यायाः बलात्कारस्य वार्ता सहितुं न शक्यते। अस्मिन् समाजे बलात्कृतायाः स्त्रियाः विषये वचनं वक्तुं न शक्यते । तस्याः दोषः नास्ति इत्यपि जीवन पर्यन्तं बलात्कारपीडितायाः लेबलेन सह जीवितुं भवति ।
अतः बलात्कारिणः सामान्य दण्डं न अर्हन्ति ।

**कौटिल्यस्य अर्थशास्त्रे उक्तः कन्याप्रकर्म इति दण्डविधिः**[11]
अस्य बलात्कारस्य दत्तस्य दण्डस्य विषये कौटिल्यः स्वस्य अर्थशास्त्रग्रन्थे कण्टकशोधनम् इति चतुर्थे अधिकारणे, कन्याप्रकर्माख्ये ८७ तमे प्रकरणे कुमारीं बलात्कारं करोति चेत्
दत्तस्य दण्डस्य विषये व्याख्यातवान् अस्ति । कन्याप्रकर्मेति सूत्रम्। कन्यायाः योनिक्षतेन दूषणमित्यर्थः। दण्डप्रस्तावात् तन्निमित्तो दण्डविधिः।

**04.12.01 सवर्णां अप्राप्तफलां प्रकुर्वतो हस्तवधः, चतुःशतो वा दण्डः:-** अप्राप्त फलाम् अनुद्भिन्नं पुष्पाम् ।

**04.12.02 मृतायां वधः-** मृतायां योनिक्षतवशेन प्रमीतायां सत्याम् ।

**04.12.03 प्राप्तफलां प्रकुर्वतो मध्यमाप्रदेशिनीवधो, द्विशतो वा दण्डः-** प्राप्तफलामित्यादि । मध्यमा प्रदेशिनीवधः ज्येष्ठातर्जन्योश्छदः ।

**04.12.04 पितुश्चावहीनं दद्यात्:-** पितुश्च, अवहीनं नष्टं तत्प्रार्थितं दद्यात् ।

**04.12.05 न च प्राकाम्यं अकामायां लभ्भेत:-** नचेत्यादि । अकामायां कन्यायां प्राकाम्यम् इच्छापूर्तिं, नच लभेत । अतो दण्डमात्रलाभफलं तद्रमणमित्युपदेशः ।

**04.12.06 सकामायां चतुष्पञ्चाशत्पणो दण्डः, स्त्रियाः त्वर्धदण्डः-** सकामायामिति । इच्छन्त्यं तस्यां चतुष्पञ्चाशत्पणो दण्डः । स्त्रियास्तु, अर्धदण्डः सप्तविंशतिपणः ।

**04.12.07 परशुल्कावरुद्धायां हस्तवधः, चतुःशतो वा दण्डः, शुल्कदानं च:-** परशुल्कावरुद्धायामिति । परशुल्कग्रहणप्रतिबद्धायां कंन्यायां, हस्त- वधः, चतुश्शतो वा दण्डः, अर्थात् प्रकुर्वतः शुल्कदानं च पूर्वदत्त शुल्काय परस्मै कर्तव्यं, पक्षद्वयेऽपि ।

**04.12.08 सप्तार्तवप्रजातां वरणाद् ऊर्ध्वं अलभमानः प्रकृत्य**

---

[9] The Criminal law(Amendment) Act, 2013 (Nirbhaya Act)
"President signs ordiance to effect changes in laws against sexual crimes"
India today.3 February 2013
[10] स्कन्द पुराण-माहेश्वरखण्ड-अध्याय-२३-श्लोक सं.४६

[11] कौटिलीयम् अर्थशास्त्रम्, कण्टकशोधनम् - चतुर्थंअधिकारणम्, कन्याप्रकर्माख्ये ८७ प्रकरणम्,
पु.सं.१७२, महामहोपाध्याय टि गणपति शास्त्रि,भारतीय विद्या प्रकाशन, वाराणसी, 1924

**प्राकामी स्यात्, न च पितुरवहीनं दद्यात्:** सप्तार्तवमजातामिति सप्त आर्तवानि प्रजातानि यस्यास्तां तथा- मूतां वरणादूर्ध्वम् अलभमानां कृतवरणं पुरुषं तावन्तं कालमनासादयन्ती,प्रकृत्य, प्राकामी प्राकाम्यवान् यथेच्छभोक्ता, स्यात्। नच पितुः, अवहीनं दद्यात्।

**04.12.09 ऋतुप्रतिरोधिभिः स्वाम्याद् अपक्रामतिः-** कुतः, ऋतुप्रतिरोधिभिः आर्तवरूपैस्तस्करैर्निमित्तभूतैः अपक्रामति स्वामित्वादपैति, पिता।

**04.12.10 त्रिवर्षप्रजातार्तवायाः तुल्यो गन्तुं अदोषः, ततः परं अतुल्योऽप्यनलङ्कृतायाः:-** त्रिवर्षप्रजातार्तवाया इति वर्षत्रयोपजातरजस्काया विषये, तुल्यो गन्तुम् अदोषः सजातीयस्तां गच्छन् निर्दोषः। ततः परं वर्षत्रयादूर्ध्वम्, अतुल्योऽपि गन्तुम् अदोषः, अनलङ्कृतायाः पितृद्रव्यरहितायाः विषये । पितृद्रव्यादाने स्तेयं भजेतेति पितृद्रव्यसहितायाः ग्रहणे चौर्यदण्डं प्रा- प्नुयात्।

**04.12.11 पितृद्रव्यादाने स्तेयं भजेत:-** पितृद्रव्यादाने स्तेयं भजेतेति। पितृद्रव्यसहितायाः ग्रहणे चौर्यदण्डं प्राप्नुयात्।

**04.12.12 परं उद्दिश्यान्यस्य विन्दतो द्विशतो दण्ड::-** परमुद्दिश्येत्यादि । योऽभिप्रेतः स एवाहमित्यात्मानं व्यपदिश्य तदन्यस्य कन्यां विवहतो द्विशतो दण्डः।

**04.12.13 न च प्राकांयं अकामायां लभेत:-** नच कामचारमकामायां तस्यां विन्देत |

**04.12.14 कन्यां अन्यां दर्शयित्वाऽन्यां प्रयच्छतः शत्यो दण्डः तुल्यायां, हीनायां द्विगुणः:-** कन्यामन्यामित्यादि तुल्यायां सजातीयायां सत्याम् हीनायां हीन- जातीयायां सत्याम्।

**04.12.15 प्रकर्मण्यकुमार्याश्चतुष्पञ्चाशत्पणो दण्डः, शुल्कव्ययकर्मणी च प्रतिदद्यात् अवस्थाय:-** प्रकर्मण्यकुमार्या इति। अकुमार्याः दत्ताया अक्षतयोनेः क्षतयोनी- 'करणे, चतुष्पञ्चाशत्पणो दण्डः । शुल्कव्ययकर्मणी च पूर्वप्रतिग्रहीतृदत्तं शुल्कं तत्कृतं कर्मव्ययं च प्रतिदद्याद्, अवस्थाय विवाहप्रतिभुवे।

**04.12.16 तज्जातं पश्चात्कृता द्विगुणं दद्यात्:-** पश्चात् कृता द्वितीयानन्तरं तृतीयेन स्वीकृता, तज्जातं दण्डं द्विगुणम् अष्टोत्तरशतपणं, दद्यात्।

**04.12.17 अन्यशोणित उपधाने द्विशतो दण्डः, मिथ्याऽभिशंसिनश्च पुंसः -** अन्यशोणितोपधान इति क्षतयोनित्वप्रदर्शनार्थम् अन्यरुधिरस्य स्ववस्त्रलेपने, द्विशतो दण्डः, स्त्रियाः मिथ्याभिशंसिनश्च पुंसः अक्षतयोनि- मेव क्षतयोनिरिति मिथ्यावदतः पुरुषस्य च द्विशतो दण्डः । शुल्कव्यय- कर्मणी च जीयेत शुल्कं कर्मव्ययं च दाप्येत नच प्राकाम्यमित्यादि प्रतीतम्।

**04.12.18 शुल्कव्ययकर्मणी च जीयेत:-** शुल्कव्यय- कर्मणी च जीयेत शुल्कं कर्मव्ययं च दाप्येत। नच प्राकाम्यमित्यादि प्रतीतम्।

**04.12.19 न च प्राकांयं अकामायां लभेत:-** नच प्राकाम्यमित्यादि प्रतीतम्।

04.12.20 स्त्रीप्रकृता सकामा समाना द्वादशपणं दण्डं दद्यात्, प्रकर्त्री द्विगुणम्:- स्त्री सकामा, समाना तुल्यजातीया स्त्री, प्रकृता क्षतयोनितां नीता, द्वादशपणं दण्डं दद्यात् । प्रकर्त्री तद्योनिक्षतिकर्त्री, द्विगुणं चतुर्विंशतिपणं दद्यात्।

**04.12.21 अकामायाः शत्यो दण्ड आत्मरागार्थं, शुल्कदानं च:-** अकामायाः शत्यो दण्ड इत्यादि अनिच्छन्त्या एव पुंसा स्वरागार्थे प्रकर्मणि कार्यमाणे, कारयितुः शत्यो दण्डः शुल्कदानं च।

**04.12.22 स्वयं प्रकृता राजदास्यं गच्छेत्:-** स्वयं प्रकृता स्वयं कृतयोनिक्षतिः, राजदास्यं राजदासीभावं गच्छेत्।

**04.12.23 बहिर्ग्रामस्य प्रकृतायां मिथ्याऽभिशंसने च द्विगुणो दण्डः-** बहिरिति ग्रामस्य, बहिर्देशे बिजने, प्रकृतायां सत्यां द्विगुणः चतु- र्विंशतिपणः दण्डः, स्त्रियाः मिथ्याभिशंसने च प्रकृत न प्रकृतेति मिथ्यावादे चद्विगुणो दण्डः पुंसः।

**04.12.24 प्रसह्य कन्यां अपहरतो द्विशतः, स-सुवर्णं उत्तमः:-** प्रसह्य कन्या भित्यादि उत्तमः साहसदण्डः पृथक् प्रत्येकम् । गुणिकादुहितरमिति तां प्रकुर्वतः, चतुष्पश्चाशत्पणो दण्डः शुल्कं मातुर्भोगः षोडशगुणः शुल्कं मात्रे देयम् उक्तदण्डषोडशगुणं चतुष्षष्ठ्य- षिकाष्टशतपणात्मकं भवति।

**04.12.25 बहूनां कन्याऽपहारिणां पृथग् यथा उक्ता दण्डाः**

**04.12.26 गणिकादुहितरं प्रकुर्वतश्चतुष्पञ्चाशत्पणो दण्डः, शुल्कं मातुर्भोगः षोडशगुणः:-** गुणिकादुहितरमिति तां प्रकुर्वतः, चतुष्पश्चाशत्पणो दण्डः शुल्कं मातुर्भोगः षोडशगुणः शुल्कं मात्रे देयम् उक्तदण्डषोडशगुणं चतुषष्ट्य-षिकाष्टशतपणात्मकं भवति ।

**04.12.27 दासस्य दास्या वा दुहितरं अदासीं प्रकुर्वतश्चतुर्विंशतिपणो दण्डः शुल्काबन्ध्यदानं च:-** दासस्य दास्या वेत्यादि शुल्काबन्ध्यदानं च शुल्काभरणयोर्दानं च ।

**04.12.28 निष्क्रयानुरूपां दासीं प्रकुर्वतो द्वादशपणो दण्डो वस्त्राबन्ध्यदानं च:-** निष्क्रयानुरूपां दास्यमोक्षणानुरूपां रूपादिमत्तया ।

**04.12.29 साचिव्यावकाशदाने कर्तृसमो दण्डः:-** साचिव्यावकाशदान इति कन्यादूषणं प्रति साहाय्यदाने प्रदेश- दाने च कर्तृसमः दूषकदण्डतुल्यः दण्डः ।

**04.12.30 प्रोषितपतिकां अपचरन्तीं पतिबन्धुः तत्पुरुषो वा सङ्गृह्णीयात्:-** प्रोषितपतिकामित्यादि अपचरन्तीं व्यभिचरन्तीम् । तत्पुरुषः पतिभृत्यः संगृह्णीयात् नियम्य रक्षेत् आकात प्रतीक्षेत । उभयं विसु- ज्येत जारो जारिणी च न दण्डयेत ।

**04.12.31 सङ्गृहीता पतिं आकाङ्क्षेत**

**04.12.32 पतिश्चेत् क्षमेत विसृज्येत उभयम्**

**04.12.33 अक्षमायां स्त्रियाः कर्णनासाच्छेदनं, वधं जारश्च प्राप्नुयात्**

**04.12.34 जारं चोर इत्यभिहरतः पञ्चशतो दण्डः, हिरण्येन मुञ्चतः तद्ऽष्टगुणः:-** जा रमित्यादि अभिहरतः व्यभिचारगोपनार्थमभिवदतः हिरण्येन मुतस्तदष्टगुण इति । हिरण्यमुत्कोचं गृहीत्वा जारं मुञ्चतो रक्षिपुरुषस्य गृहीतहिरण्याष्टगुणो दण्डः ।

**04.12.35 केशाकेशिकं सङ्ग्रहणं, उपलिङ्गनाद् वा शरीर उपभोगानां, तज्जातेभ्यः, स्त्रीवचनाद् वा:-** संग्रहणज्ञानोपायमाह - केशाकेशिकं संग्रहणमिति । परस्परकेश- ब्रहणपुरस्सरारब्धा कामकेलिः केशाकेशि तदेव केशाकेशिकं, तत् प्रत्यक्षदृष्टं कर्तृभूतं, संग्रहणं, बोधयतीति शेषः उपलिङ्गनाद् वा शरीरोपभोगानां कस्तू-र्याद्युपभोगलिङ्गदर्शनाद् वा, संग्रहणं जानीयात् तज्जातेभ्यः ताद्वेषये शेत- शेभ्यो जानीयात् । स्त्रीवचनाद् वा परामृष्टा वाक्याद् वा जानीयात्

**04.12.36 परचक्राटवीहृतां ओघप्रव्यूढां अरण्येषु दुर्भिक्षे वा त्यक्तां प्रेतभाव उत्सृष्टां वा परस्त्रियं निस्तारयित्वा यथासम्भाषितं समुपभुञ्जीत:-** दण्डनीं परस्त्रीग्रहणप्रकारमाह - परचक्राटवीतामिति परच-कापहृताम् आटविकहृतां च, ओघप्रव्यूढां नदीप्रवा हनीताम्, अरण्येषु दुर्भिक्षे वा त्यक्तां, प्रेतभावोत्सृष्टां वा रोगोन्मूर्च्छनात् मृतत्वबुद्ध्या परित्यक्तां वा, परस्त्रियं, निस्तारयित्वा विपदुतीर्णी कृत्वा, यथासंभाषेतं समुपभुञ्जीत परस्पर- संविदनुरोधेन भार्यीकृत्य दासीकृत्य वा सम्यग् उपभुञ्जीत ।

**04.12.37 जातिविशिष्टां अकामां अपत्यवतीं निष्क्रयेण दद्यात्:-** इह निस्तारयि- स्वेति समासाकरणमार्षम् जातिविशिष्टां जा उत्कर्षवतीम्, अकामां सजाति-स्वेऽप्यकामाम्, अपत्यवर्ती, निष्क्रयेण दद्यात् निस्तरणश्रमवेतनग्रहणेन तत्स्वामिनेऽर्पयेत् ।

**04.12.38 चोरहस्तान्नदीवेगाद् दुर्भिक्षाद् देशविभ्रमात्:-** अध्यायान्ते श्लोकानाह चोरहस्तादित्यादि राजप्रतापेन स्व-जनेन वा प्रमुक्तां राजकोषत्यक्तां स्वजनपरित्यक्तां वा न तु भुञ्जीतेत्यत्र संबन्धनीयम् एवं तृतीयश्लोकपूर्वार्धेऽपि न च भुञ्जीतेति योजनीयम् ईदृशीम् उत्तमजातिम् अनिच्छन्तीं पूर्वापत्यवतीं च अपवाहयेत् अपनाययेत् प्रदापयेदिति कापि पाठः ।

**04.12.38 निस्तारयित्वा कान्तारान्नष्टां त्यक्तां मृता इति वा**
**04.12.39 भुञ्जीत स्त्रियं अन्येषां यथासम्भाषितं नरः ।**
**04.12.39 न तु राजप्रतापेन प्रमुक्तां स्वजनेन वा**
**04.12.40 न च उत्तमां न चाकामां पूर्वापत्यवतीं न च ।**
**04.12.40 ईदृशीं त्वनुरूपेण निष्क्रयेणापवाहयेत् (इति)**

एवं प्रकारेण कौटिल्यः भिन्न-भिन्न-स्थितौ दण्ड-अर्हता च भिन्न-भिन्न-प्रकारान् उक्तवान् । अविवाहितकन्यायाः बलात्कारः जघन्यः अपराधः भवति, यद्यपि नानाप्रकरणेषु भिन्नाः दण्डाः भवन्ति । अतः सः अविवाहितकन्यायाः बलात्कारस्य हस्ताः छिन्नव्याः, बालिका मृता चेत् मृत्युदण्डः भवितव्यः, अविवाहितकन्यायाः बलात्कारस्य मध्यमाङ्गुली अल्पाङ्गुली छिन्नम्
च भवेयुः इति तीव्रदण्डं प्रयच्छति । तथा च तेन उक्ताः

भयङ्करः हस्तच्छेदन-अङ्गुलीच्छेदनदण्डाः केवलं अविवाहितायाः बालिकायाः बलात्कारे एव सीमिताः सन्ति।

**भारते विदेशे दीयमानः बलात्कार दण्डः**

वर्तमानकाले अपि अस्माकं देशे बलात्कारस्य दण्डः प्रकरणान्तरे भिन्नः भवति । प्रायः ७तः १० वर्षपर्यन्तं कारावासः अथवा आजीवनकारावासः[12]। अधिकतमं दण्डं मृत्युदण्डः एव।

चीन, सऊदी अरब, उत्तरकोरिया, अफगानिस्तान, मिस्र इत्यादिषु देशेषु बलात्कारस्य कठोरतमाः दण्डाः प्रदत्ताः भवन्ति । चीनदेशे बलात्कारस्य मृत्युदण्डः भवति, अन्ते अपराधिनः जननेन्द्रियविच्छेदेन वधं प्राप्नुवन्ति । सऊदी अरबदेशे इस्लामिकदेशत्वेन बलात्कारिणः सार्वजनिकरूपेण शिरःच्छेदनं कुर्वन्ति । शरीरं च शिरः च संसितम् । बलात्कारिणः शिलापातेन मृत्युदण्डं दातुं शक्यन्ते । बलात्कारी शिलापातेन मृतः भविष्यति । एषः नियमः स्त्रियाः पुरुषाणां च कृते प्रवर्तते । उत्तरकोरिया, अफगानिस्तान, इरान् इत्यादिषु देशेषु बलात्कारस्य विवादस्य दिवसेषु एव बलात्कारिणः गोलिकाभिः मारिताः वा लटकिताः वा भवन्ति।

**उपसंहार**

बलात्कारिणः मृत्युदण्डः क्रूरः दण्डः न भवति ।केवलं बलात्कारं मृत्युदण्डेन दण्डयित्वा बलात्कारीं सद्यः एव मारयित्वा बलात्कारे भयं न प्रवर्तते । अतः कौटिल्येन उक्तं- (सवर्णां अप्राप्तफलां प्रकुर्वतो हस्तवधः दण्डः, प्राप्तफलां प्रकुर्वतो मध्यमाप्रदेशिनीवधो दण्डः) यत् एतस्मात् अधिकं शरीरस्य पीडां जनयति इति दण्डः कर्तव्यः यथा हस्तच्छेदनम्, अङ्गुलीच्छेदनम्। एवं कौटिल्येन उक्तं देशान्तरे दत्तं च यः दण्डः शरीरदुःखं जनयति सः सार्वजनिकरूपेण दातव्यः। तदा जनाः भीताः भवितुम् अर्हन्ति। भविष्ये दुष्कृतस्य पूर्वदण्डस्य भयम् अपि सहायकं भवितुम् अर्हति ।बलात्कारस्य भयं प्रवर्तयितुं अपि सहायकं भवितुम् अर्हति । स्त्रीबलात्कारेणाभिगमाय भयोपायः औषधिर्भवितुं शक्यते।

**परामृष्ट ग्रन्था**

1. Arthashastra of Koutilya, Edited with the Commentary of "Srimula" of Mahamahopadhyaya T. Ganapati Shastri, Bharatiya Vidya Prakashan, Varanasi, Year of publication-1924.
2. Women and the Constitution, S.G. Palleda, Vidyanidhi Prakashan, Year of publication-2015
3. The Law on Rape, S.G. Palleda, Vidyanidhi Prakashan, Year of publication-2015
4. Koutalyana arthashastra (kannada), Anuvada: K Krishnabhatta, Samaja Pustakalaya, Dharwad
5. Koutaliya arthashastra (kannada), Shri Kudali Shringeri Jagadguru, Shri Sachchidananda Shankarabharati Swamigalu

1. ऋग्वेद संहिता, एच्.पि.वेङ्कटराव्, Published by Authority of Government of Mysore.
2. गरुडपुराण

**सहायकजालस्थलानि**

1. Punishment for Rape Victim in Different Countries of Scoopwhoop website by Rohith bhattacharya.
2. Punishment for Rape Victim in Different Countries of Pathlegal.in
3. Countries which gives most Severe Punishment for Rape of Indiaforums
4. Laws regarding Rape.
5. Rape Wikipedia

[12] The Law on Rape, S.G. Palleda Vidyanidhi Prakashan, Year of publication; c2015.